## नित्यं छन्दसि । (४६/३४४६)

बह्वादिभ्यः छन्दसि विषये नित्यं [1]स्त्रियां ङीष् प्रत्ययो भवति । बह्वीषु हित्वा [2]प्रपिबन् । बह्वी नाम ओषधी भवति । नित्यग्रहणमुत्तरार्थम् ॥

## भुवश्च । (४७/३४४७)

छन्दसि विषये स्त्रियां भुवो नित्यं ङीष् प्रत्ययो भवति । '[3]विभ्वी च' (ऋ. ५.३८.१) । 'प्रभ्वी च' (ऋ. १.१८८.५) । [4]संभ्वी च । इह कस्मान् न भवति, स्वयम्भूः? उतः (४.१.४४/५०२) इति [5]तपरकरणमनुवर्तते । ह्रस्वादेवेयं पञ्चमी । भुवः[6] इति सौत्रो निर्देशः ॥

## पुंयोगादाख्यायाम् । (४८/६०४)

[7]पुंसा योगः पुंयोगः । पुंयोगाद्धेतोर्यत् प्रातिपदिकं स्त्रियां वर्तते पुंस आख्याभूतं तस्माद्[8] ङीष् प्रत्ययो भवति । गणकस्य स्त्री गणकी । [9]महामात्री । प्रष्ठी । प्रचरी । पुंसि [10]शब्दप्रवृत्तिनिमित्तस्य [11]सम्भवात् पुंशब्दा एते, तद्योगात् स्त्रियां वर्तन्ते । पुंयोगात् इति किम् ? देवदत्ता । [12]यज्ञदत्ता । आख्याग्रहणात् किम् ? परिसृष्टा । [13]प्रजाता । पुंयोगादेते शब्दाः स्त्रियां वर्तन्ते, न तु पुमांसमाचक्षते ।

[३५०] गोपालिकादीनां प्रतिषेधः[14] । (म. भा. २.२१७)

गोपालकस्य स्त्री गोपालिका[15] ।

[३५१] सूर्याद् देवतायां चाब् वक्तव्यः । (म. भा. २.२२०)

सूर्यस्य स्त्री देवता सूर्या । देवतायाम् इति किम् ? [16]सुरी ॥

## इन्द्रवरुणभवशर्वरुद्रमृडहिमारण्ययवयवनमातुलाचार्याणामानुक् । (४९/६०६)

इन्द्रादिभ्यः प्रातिपदिकेभ्यः स्त्रियां ङीष् प्रत्ययो भवति, आनुक् चागमः । येषामत्र पुंयोग एव इष्यते, तेषाम् आनुगागममात्रं [17]विधीयते । प्रत्ययस्तु पूर्वेणैव सिद्धः । अन्येषां तूभयं[18] विधीयते । इन्द्राणी । वरुणानी । भवानी । शर्वाणी । रुद्राणी । मृडानी ।

[३५२] हिमारण्ययोर्महत्त्वे[19] । (म. भा. २.२२०)

महद्धिमं हिमानी । महदरण्यम् अरण्यानी ।

---

1. स्त्रियां नास्ति फ. 2. अविदन् ड. इ, प्रापिपन् ब, वपामपादिदम् ह. 3. बह्वीश्च फ. 4. नास्ति फ. ह, शंभ्वी च ब. क. इ. ड. 5. तपरत्वम् ड. ब. 6. धातोः इत्यधिकम् ब. 7. पुंसः क. 8. स्त्रियां इत्यधिकम् फ. 9. महामात्रस्त्री इत्यधिकम् फ. 10. प्रवृत्तिनिमित्तस्य ब. इ. 11. संभवत्पुंशब्दाः ब. 12. नास्ति फ. 13. प्रमाता फ. 14. वक्तव्यः इत्यधिकम् ह. 15. पशुपालिका इत्यधिकम् क. ड. फ. 16. सौरी ब, सुरी मानुषी ड. ह. 17. विधेयम् ह, आनङ्मात्रं विधीयते ब. 18. एव इत्यधिकम् ब. 19. महतोः ह.